पूतिभावसाधनत्वात्तथात्वम्। "अप्रकाशे देशे कोथयेत्" सुश्रुतः।

**कुथ** पुंस्त्री० कुथ—पूतीभावे क कुन्थ—निष्कर्षे—क नलोपोवा। "कुथा १कन्था समाख्याता कुथः स्यात् २करिकम्बलम्। कुथः ३कुशः कुथः ४कीटः ५प्रातःस्नायी द्विजः कुथः, इत्युक्तेष्वर्थभेदेषु लिङ्गभेदस्तु रूपभेदादुदीर्यते"। "कुथेन नागेन्द्रमिवेन्द्रवाहनम्"। "आचिप्तकेतुकुथसैन्यगजच्छलेन" माघः। "शतयस्य कुथांस्तत्र सिंहलाः समुपाहरन्" भा० स० ५१अ०। हस्तिकम्बले पुंस्त्री अमरः। "महत्या कुथयास्तीर्णां पृथिवीलक्षणाङ्कया" रामा०। "तत्र कुशे "शाद्वलेषु यदाशिश्ये वनान्ते वनगोचरा। कुथास्तरणतल्पेषु किं स्यात् सुखतरं ततः" रामा०।

**कुथुम** पु०सामवेदशाखाभेदे। तं वेत्ति इनि। कुथुमिन् अण् वा। कौथुम तच्छाखाध्यायिनि। सामवेदशब्दे विवृतिः। कुथुमिना प्रोक्तमधीयते अण् नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिसमापिकुथुमीत्यादि" वा०टिलोपः। कौथुम तत्प्रोक्ताध्यायिषु भूम्नि लि०।

**कुथोदरी** स्त्री कुम्भकर्णपौत्रां निकुम्भदुहितरि। सा च कल्किना हता यथाह कल्किपु० १६अ०

"मुनय ऊचुः। शृणु विष्णुयशःपुत्र! कुम्भकर्णात्मजात्मजा। कुथोदरीति विख्याता गगनार्द्धसमुत्थिता॥ कौलकञ्जस्य महिषी निकञ्जजननी च सा। हिमालये शिरः कृत्वा पादौ च निषधाचले॥ शेते स्तनं पाययन्ती निकञ्जं प्रस्नुतस्तनी। तस्या निश्वासवातेन विवशा वयमागताः॥ दैवेनैव समानीताः प्राप्तास्तव पदाम्बुजम्। मुनयो रक्षणीयास्ते रक्षःसु च विपत्सु च॥ इति तेषां वचः श्रुत्वा कल्किः परपुरञ्जयः। सेनागणैः परिवृतो जगाम हिमवद्गिरिम्"।

इत्युपक्रम्य तया सह युद्धे ससैन्यकल्केस्तदुदरवेशमुपवर्ण्य "कल्किः कमलपत्राक्षः सुरारातिनिसूदनः। वाणाग्निचेलचर्म्मभ्यां कम्बलैर्यानदारुभिः। प्रज्वाल्योदरमध्येन करवालं समाददे॥ तेन खड्गेन महता कुक्षिं निर्भिद्य बन्धुभिः। बलिभिर्वाहभिर्व्वीरैर्वृतः शस्त्रास्त्रपाणिभिः। वहिर्ब्बभूव सर्व्वेशः कल्किः कलकविनाशनः। सहस्राक्षो यथा वृत्रकुक्षिं दम्भोलिनेमिना॥ योनिरश्वाद्गजरथास्तुरगाश्चाभवन् बहिः। नासिकाकर्णविवरात् केऽपि तस्या विनिर्गताः। ते निर्गता क्षतत्रस्ताः सैनिका रुधिरोक्षिताः। तां विव्यधुर्निः- क्षिपन्तीं तरसा चरणौ करौ॥ ममार सा भिन्नदेहा भिन्नकुक्षिशिरोधरा"। [ कुदत्। धातुपाठः।

**कुद** मिथ्योक्तौ चु० सक० उभ० सेट्। कोदयति ते। अचू-

**कुदाल** पु० कुं भूमिं दलति दल—भेदने अण् उप०स०। कुद्दाले (कोदाल) रमानाथः।

**कुदिन** न० कोः पृथिव्याः भ्रमणेन दिनम्। १सावनदिने। तद्भक्तं सू० सि०। "औदयादौदयं भानोः सावनं तत् प्रकीर्त्तितम्। सावनानि स्युरेतेन यज्ञकालविधिस्तु तैः" "सूर्य्यस्योदयादुदयकालमारभ्याव्यवहितोदयकालपर्यन्तं यत् कालात्मकं तत् सावनं मानमुक्तम्। एतेनोदयद्वयान्तरात्मककालस्य गणनया सावनानि वक्ष्यद्रष्टाद्रीत्यादिना मध्यमाधिकारोक्तानि भवन्ति। तद्व्यवहारमाह। यज्ञकालविधिरिति यज्ञस्य यः कालस्तस्य गणना तैः सावनैः। तुकारोऽन्यमाननिरासार्थकैवकारपरः" रङ्गना०। निरुपपदसावनदिनस्य सूर्य्यसंबन्धिसावनदिनपरत्वं युगे तत्संख्या च तत्रैव दर्शिता यथा

"औदयादौदयं भानोर्भूमिसावनवासराः"॥.

"ननु भोदया भगणैरित्यादिना पूर्वं सर्वेषां सावनदिवसा उक्ता इत्यत्र कस्य ग्राह्या इत्यतः सूर्य्यसावनस्वरूपकथनच्छलेनोत्तरमाह। औदयादिति। सूर्य्यस्योदयकालमारभ्याव्यवहिततदुदयकालपर्यन्तं यः कालः स एको दिवसः। इति ये दिवसास्ते भूमिसावनवासराः। भूदिवसा उदयस्य भूसम्बन्धेनावगमात् सावनदिवसाश्चेत्यर्थः। तथा च निरुपपदसावनभूमिशब्दाभ्यां सूर्य्यस्य वासरा एव नान्येषां सोपपदत्वाभावादिति भावः" रङ्गना०। ते कियन्त इत्यतस्तन्मानमाह

"वसुद्व्यष्टाद्रिरूपाङ्क सप्ताद्रितिथयोयुगे" सू०सि०। "अष्टाश्विगजसप्तभूगोनगसप्तपञ्चभूमिता १५७७९१७८२८ युगे सूर्य्यसावनदिवसाः"रङ्गना०। सि०शि०अन्यथोक्तं यथा "भूदिनानि शरवेदभूपगोसप्तसप्ततिथयोऽयुताहताः १५७७९१६४५०००० । भभ्रमास्तु भगणैर्विवर्जिता यस्य तस्य कुदिनानि तानि वा" सि०शि०।

"एषामुपपत्तिः प्रागेवोक्ता। एकस्मिन् रविवर्षे यावन्तो भभ्रमाः स्युस्तावन्त एकैकोना रविसावनदिवसा भवन्ति। यतो रविः प्राग्गत्या एकं पर्यायं गतः। अतो भगणैस्त्र्ययोना भभ्रमाः कहा भवन्ति। एवमन्येषामपि यच्छायां कुदिनानि स्युरित्युपपन्नम्" प्रमि०।

"इनोदयद्वयान्तरं तदर्कसावनं दिनम्। तदेव मेदिनी-